वर्षम् - ०२ अङ्कः - ०२ शोधज्योतिः
जनवरी-दिसम्बर, २०२० ISSN-2350-0700

# विक्रमोर्वशीये उर्वश्याः मानवीकरणम्

**डॉ. डायालाल मा. मोकरिया[१]**

संस्कृतसाहित्यजगत्यनेककवयः शोभन्ते। तेषु महाकविकालिदासोऽन्यतमोऽस्ति। कालिदासस्य सप्तकृतिष्वपि वैविध्यमस्ति। काव्येषु नाटकं रम्यमित्युक्त्यनुसारं तस्य नाटकत्रयं स्ववैशिष्ट्येन प्रशंसां प्राप्नोति। अभिज्ञानशाकुन्तलं श्रेष्ठनाटकेषु प्रथमपङ्क्तौ वर्तते, किन्तु मालविकाग्निमित्रमपि कामपि न्यूनतां न भजते। विक्रमोर्वशीयनाटकमप्यनेकविशेषताभिः संस्कृतसाहित्ये गौरवं भजते। अस्मिन्नाटके कविना स्वर्गस्याप्सरसः उर्वश्याः एवं पृथ्वीलोकस्य राज्ञः पुरुरवसः प्रणयकथां निरूप्य स्वर्गपृथव्योरद्वैतसम्बन्धः सूचितोऽस्ति। अत्र कविः पुरुरवसं देवत्वं ददात्येवमुर्वश्यै मानवत्वम्। पुरुरवस्येकस्मिन् मानवे देवानां गुणान्निरूप्य कविना मानवस्य गौरवं तु कृतमेव, किन्तु देवाङ्गना उर्वश्यपि तस्याः दिव्यत्वं त्यक्त्वा मानवत्वं स्वीकरोति तदितोऽप्यधिकं विशेषमस्ति। विष्णुपुराणेऽप्युक्तमस्ति यत् -

**गायन्ति देवाः किल गीतकानि धन्यास्ते भारतभूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्।।[२]**

एतदत्र सम्पूर्णतया सार्थकं भवति। मानवस्य किं गौरवमस्ति। अस्याः भारतभूम्याः मनुष्यस्य किं महत्त्वमस्ति तदुर्वश्याः पात्रे कविः सम्यक्तया सूचयति। अतोऽत्राप्युर्वश्याः पात्रस्य मानवीकरणस्यौचित्यस्यास्मिन् शोधपत्रे वर्णनमस्ति।

पुरुरवसः उर्वश्याः च मूलकथानकं ऋग्वेदे वर्तते।[३] विष्णुपुराणे भागवतपुराणे मत्स्यपुराणे चापि इदं कथानकं प्राप्यते। विक्रमोर्वशीयस्य कथानकं प्राचीनमस्ति तदपि कविः कालिदासः स्वप्रतिभया नाटकेऽद्भुतं कौशलं प्रदर्शयति। आनन्दवर्धनाचार्यः कथयति -

**दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।**
**सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः।।[१]**

---

[१] आसि.प्रोफेसर, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावल,गुजरात

[२] विष्णुपुराणम्, ३-२-२४

[३] ऋग्वेदः, १०/९५

कविः पुरातनार्थं प्रतिभया नूतनं करोति तथैवात्राप्यास्ति। कविः उर्वश्याः पात्रेण मानवगौरवं करोति। महाकविः कालिदासः व्यञ्जनायाः कविरस्ति। सः स्वरचनासु स्वाभाविकरूपेण सूचनकलायाः निर्वाहं करोति। विक्रमोर्वशीयेऽपि कविवरः कालिदासः नाटकस्य प्रस्तावनायां स्पष्टरूपेण सूचयति यत् उर्वश्यप्सराः इव न प्रतीयते। केशीदानवः चित्रलेखया सह उर्वश्याः अपहरणं करोति। राजा पुरुरवाः मोचयति तदाप्युर्वशी भयं न त्यक्त्वा मूर्च्छिता भवति। अतः चित्रलेखा कथयति अनप्सरेव प्रतिभाति मे।[२] अपहृता उर्वशी सखीजनान् पुनर्मिलति तदा सा मानवस्त्रीवत् स्वमनोभावान् प्रकटयति **सख्यः एतां पीडितां मां परिष्वजध्वम्। न खलु ममासीदाशा भूयोऽपि सखीजनं द्रक्ष्यामीति।**[३] आशानिराशादयः भावाः मानवेषु भवन्ति, किन्त्वत्रोर्वश्यपि केशीदानवात् भयमनुभूय सखीजनान् प्रति मनोभावं प्रकटयति। अप्सराः उर्वशी पूर्वरचनासु प्रायः अप्सराः एवास्ति। अर्थात् प्रायः अप्सरसः गुणधर्मान् अनुसरति। मूलकथानके ऋग्वेदे त्वासक्तं पुरुरवसमुर्वशी कथयति यत् **न वै स्त्रैणानि सख्यानि सन्ति साला वृकाणां हृदयान्येता।**[४] स्त्रिभिः सह मैत्री शक्या नास्ति। अप्सरसः कुत्राप्येकस्मिन्नासक्तिः न भवति। तदत्रापि सूचितमस्ति। किन्तु विक्रमोर्वशीये तु उर्वशी आसक्तास्ति। अतः तु सा केशीदानवस्योपकारमप्युपकारं मन्यते। **उपकृतं खलु दानवैः।**[५]

दानवः अपहरणं कृतवान् अतः एव राजा पुरुरवाः प्राप्तः। सा स्वसौभाग्यं मन्यते। आसक्त्यारयं मानवीयगुणोऽत्रोर्वश्यां दृश्यते। उर्वशी पुरुरवस्यासक्तासीत् तत्तु मत्स्यपुराणेऽप्यस्ति उर्वशी यस्य पत्नीत्वगममद्रुपमोहिता।[६] अत्र उर्वशी पुरुरवसः रूपे मोहमनुभवति किन्त्वनन्तरं तं त्यजत्यपि। अस्मिन्नाटके तु सा पुरुरवसा सह चिरकालं यावत् निवसत्यपि। न त्यक्तुमिच्छति, न त्यजत्यपि। लज्जा मानवस्त्रीणामाभूषणमस्ति। उर्वश्यामप्ययं मानवीयगुणः वर्तते। हेमकूटपर्वतात् रथस्यावतरणं भवति। तदा पुरुरवसः स्पर्शः भवत्यतः सा सखीं चित्रलेखां कथयति - **सखि किमपि परतोऽपसर।**[७] अत्राप्सराः उर्वशी व्रीडामनुभवति। तस्याः भावं चित्रलेखा सम्यक्तया जानात्यतः एव सा कथयति नाहं सक्ता।[८]

---

[१] ध्वन्यालोकः, ४/४

[२] विक्रमोर्वशीयम्, १, पृ.७२

[३] विक्रमोर्वशीयम्, १, पृ.७६

[४] ऋग्वेदः, १०/९५/१५

[५] विक्रमोर्वशीयम्, १ पृ.७२

[६] मत्स्यपुराणम्, २४-१२

[७] विक्रमोर्वशीयम्, १ पृ.७४

[८] विक्रमोर्वशीयम्, १ पृ.७४

नृपं प्रति उर्वश्याः आसक्त्याः अत्र पुष्टिः भवति। इमं मौलिकं प्रसङ्गं निरूप्य कविः अप्सरसः मानवीकरणं करोति। उर्वशी राजानं पुरुरवसं प्रति मोहितास्ति। अतः गमनकालेऽपि तस्यानुमतिं नेतुं न शक्नोति। सङ्कोचमनुभवति। एवं शिष्टाचारोऽपेक्षितोऽस्त्यतः सा चित्रलेखां कथयति - **सखि, चित्रलेखे उपकारिणमपि राजर्षिं न शक्नोम्यामन्त्रयितुम्। तत्त्वं मे मुखं भव।**[1] अत्र उर्वश्यां मानवस्त्रीवत् स्त्रीसहजसङ्कोचः दृश्यते। अयं प्रसङ्गोऽपि कवेः मौलिकोऽस्ति। मानवस्त्रीषु दृश्यमानः भावः द्वयोः सख्योः वार्तालापे दृश्यते। प्रणयिजनानां प्रणयचेष्टामुर्वश्यपि करोति। सा स्वर्गलोकं गच्छति तत्पूर्वं पुरुरवसः इतोऽप्यधिकसङ्गमिच्छति किन्तु सा पराधीनास्ति तदपि सा एकावलिप्रसङ्गनिमित्ते प्रियतमं पश्यति।- **अहो लताविटप एकावली वैजयन्तिका मे लग्ना।**[2] न केवलं तदेव, सा सखीं चित्रलेखां साहाय्यं कर्तुमपि व्यञ्जनायां कथयति। **सखि स्मर तावदेतदात्मनो वचनम्।**[3] उर्वशी देवाङ्गनास्त्यतः समर्थाप्यस्ति तदप्यत्र मानवस्त्रीवत् व्यवहरति। मानवभावानां निरूपणाय कविरिममपि मार्मिकं प्रसङ्गं निरूपयति। भावनाशीलमानवस्वभावस्यात्रापि गौरवमस्ति। स्वर्गलोकेऽपि उर्वशी पुरुरवसः एव चिन्तनं करोति। तस्य विरहः सन्तापं ददाति। सा स्वस्य प्रणयपत्रे स्पष्टरूपेणास्योल्लेखं करोति। -

**स्वामिन्सम्भाविता यथाहं त्वयाऽज्ञाता।**
**तथानुरक्तस्य यदि नाम तवोपरि।।**

**ननु मम लुलितपारिजातशयनीये भवन्ति।**
**नन्दनवनवाता अप्यत्युष्णकाः शरीरके।।**[4]

अतः एव सा स्वर्गलोकं त्यक्त्वा पृथ्वीलोकमागच्छति। विदूषकपुरुरवसयोः संवादेन उर्वशी जानाति यत् पुरुरवाः कामपि प्रियां प्रत्यासक्तो वर्तते। तां स्त्रियं ज्ञातुं समर्थाऽस्ति तदपि सा साहसं न करोति। अतः सखी चित्रलेखा कथयति - **किं पुनर्मानुष्यं विडम्ब्यते।**[5] उर्वश्यामत्रापि चित्रलेखा मनुष्यभावं पश्यति। उर्वश्युत्तरमपि ददाति यत् - **बिभेमि सहसा प्रभावाद्विज्ञातुम्।**[6] उर्वश्याः नृपं राजानं राजानं प्रत्यासक्तिरस्त्यतः कदाचित् नृपस्य चित्तेऽन्या स्त्री भवेत् तदा उर्वश्यै सह्या नास्ति। इदृश्यां स्थित्यां मानवस्त्रीसहजायाः असहिष्णुतायाः भावोऽत्र दृश्यते। भरतस्य नाट्यप्रयोगे उर्वशी क्षतिं करोति तत्रापि मानवसहजस्वभावः दृश्यते। मत्स्यपुराणेऽप्यं प्रसङ्गोऽस्ति -

---

[1] विक्रमोर्वशीयम्, १ पृ.७८

[2] विक्रमोर्वशीयम्, १ पृ.७८

[3] विक्रमोर्वशीयम्, १ पृ.७८

[4] विक्रमोर्वशीयम्, २/१२,१३

[5] विक्रमोर्वशीयम्, २, पृ.८८

[6] विक्रमोर्वशीयम् ,२, पृ.८८

**ननर्त सलयं तत्र लक्ष्मीरूपेण चोर्वशी।**
**सा पुरूरवसं दृष्ट्वा नृत्यन्ती कामपीडिता।।**[१]

उर्वशी कामासक्तासीत् इत्यतः क्षतिं करोति। कविः विक्रमोर्वशीयेऽप्यमुं प्रसङ्गं निरूपयति। लक्ष्म्याः पात्रे स्थित्वा उर्वशी पुरुषोत्तमे इति भणितव्ये पुरुरवसि इति वदति। तत्र नाटकस्य पात्रे सा एकरूपा भवितुं न शक्नोत्येवं मानवीयभावे पुरुरवसः चिन्तनेऽस्त्यतः एव क्षतिं करोति। भवतु नाम तत्र भरतस्य नाट्यप्रयोगे क्षतिः, किन्तु उर्वश्याः अन्तःकरणस्यात्र वास्तविकता एवं सत्यता मानवभावं सूचयति।

ऋग्वेदानुसारमुर्वशी पुरुरवसा सह केवलं चतुर्वर्षपर्यन्तमेव निवसति - **यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः।**[२] किन्त्वत्र तु उर्वशी मानवलोके एव स्थातुमिच्छति। अतः एव शापस्य समयः पूर्णः न भवेदतः स्वपुत्रं च्यवनाश्रमं प्रति स्थापयति। प्रसङ्गोपात् शापावधिः पूर्णा भवति तदापि सा दुःखमनुभवति। इन्द्रस्य सन्देशात् पुरुरवसः सानिध्यं तथैव भवति इति श्रुत्वा पुनः आनन्दमनुभवति। इत्थमुर्वशी मानववत् सुखदुखात्मकान् भावान् अनुभवति।

इत्थमस्मिन् रूपके कविना उर्वश्याः पात्रस्य विशेषरूपेण मानवीकरणं कृतमस्ति। तेन नाटकीयकार्यमधिकमनुकूलं कृतमस्ति किन्तु तेन सह मानवस्य गौरवमपि कृतमस्ति। उर्वशीपुरुरवसयोः प्राचीनकथासु परिवर्तनं कृत्वाथवा मौलिकप्रसङ्गान् योजयित्वा उर्वश्याः मानवीकरणेऽपि कवेः कौशल्यं दृश्यते।

## सन्दर्भग्रन्थसूचिः

१. विक्रमोर्वशीयम्, पार्श्व प्रकाशन, अहमदाबाद, २०००
२. ऋग्वेदः, स्वाध्याय मंडल, पारडी
३. विष्णुपुराणम्, गीताप्रेस, गोरखपुर, सं.२०५८
४. मत्स्यपुराणम्, सरस्वती पुस्तक भंडार, अहमदाबाद, २०००
५. ध्वन्यालोकः, पार्श्व प्रकाशन, अहमदाबाद, १९९६

[१] मत्स्यपुराणम्, २४/९

[२] ऋग्वेदः,१०/५/१६